गुणः - सूत्रसहिता दृष्टिः

१. भू (भ्वादिः , सत्तायाम्) - लट्-लकार-प्रथमपुरुष-एकवचनस्य विवक्षायाम्

भू + शप् + तिप्

→ भू + अ + ति [**लशक्वतद्धिते** (१.३.८) , **हलन्त्यम्** (१.३.३) , **तस्य लोपः** (१.३.९)]

→ भ् + ऊ + अ + ति

→ भ् + ओ + अ + ति [**तिङ्शित् सार्वधातुकम्** (३.४.११३) ,
सार्वधातुकार्धधातुकयोः (७.३.८४) - ऊ + अ → ओ + अ]

→ भ् + अव् + अ + ति [**एचोऽयवायावः** (६.१.७७) - ओ + अ → अव् + अ]

→ **भवति** [वर्णमेलनम्]

२. जि (भ्वादिः , जये) - लट्-लकार-प्रथमपुरुष-एकवचनस्य विवक्षायाम्

जि + शप् + तिप्

→ जि + अ + ति [**लशक्वतद्धिते** (१.३.८) , **हलन्त्यम्** (१.३.३) , **तस्य लोपः** (१.३.९)]

→ ज् + इ + अ + ति

→ ज् + ए + अ + ति [**तिङ्शित् सार्वधातुकम्** (३.४.११३) ,
सार्वधातुकार्धधातुकयोः (७.३.८४) - इ + अ → ए + अ]

→ ज् + अय् + अ + ति [**एचोऽयवायावः** (६.१.७७) - ए + अ → अय् + अ]

→ **जयति** [वर्णमेलनम्]

गुणः - सूत्रसहिता दृष्टिः

२. नीञ् (णीञ्) (भ्वादिः , प्रापणे) - लट्-लकार-प्रथमपुरुष-एकवचनस्य विवक्षायाम्

नीञ् + शप् + तिप्

→ नी + अ + ति [**लशक्वतद्धिते** (१.३.८) , **हलन्त्यम्** (१.३.३) , **तस्य लोपः** (१.३.९)]

→ न् + **ई** + **अ** + ति

→ न् + **ए** + **अ** + ति [**तिङ्शित् सार्वधातुकम्** (३.४.११३) ,
सार्वधातुकार्धधातुकयोः (७.३.८४) - **ई** + **अ** → **ए** + **अ**]

→ न् + **अय्** + अ + ति [**एचोऽयवायावः** (६.१.७७) - **ए** + **अ** → **अय्** + अ]

→ **नयति** [वर्णमेलनम्]

४. हृञ् (भ्वादिः , हरणे) - लट्-लकार-प्रथमपुरुष-एकवचनस्य विवक्षायाम्

हृञ् + शप् + तिप्

→ हृ + अ + ति [**लशक्वतद्धिते** (१.३.८) , **हलन्त्यम्** (१.३.३) , **तस्य लोपः** (१.३.९)]

→ ह् + **ऋ** + **अ** + ति

→ ह्` + **अ** + **अ** + ति [**तिङ्शित् सार्वधातुकम्** (३.४.११३) ,
सार्वधातुकार्धधातुकयोः (७.३.८४) - **ऋ** + **अ** → **अ** + **अ**]

→ ह + **अर्** + अ + ति [**उरण् रपरः** (१.१.५१) - **अ** → **अर्**]

→ **ह`रति** [वर्णमेलनम्]

गुणः - सूत्रसहिता दृष्टिः

गुणः इत्युक्ते किम् ? गुणः इति किञ्चन कार्यम् |

गुणकार्यम् कुत्र भवति ? अङ्गे भवति |

अङ्गम् इत्युक्ते किम् ? प्रत्ययात् पूर्वं यद् अस्ति तद् अङ्गम् |

उदा - **भू** (भ्वादिः , सत्तायाम् , परस्मैपदी)

लट्-लकारस्य विवक्षायाम् - भू + शप् + तिप् → भवति

अत्र , **भू** - धातुः

शप् - भ्वादिगणस्य विकरणप्रत्ययः |

भू - शप् इत्यस्य अङ्गम् | सः धातुः अपि |

तिप् - लट्-लकारे प्रथमपुरुषे एकवचनस्य तिङ् प्रत्ययः |

भू + शप् → **भव** - तिप् इत्यस्य अङ्गम् |

गुणः - सूत्रसहिता दृष्टिः

सूत्रम् -

यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् (१.४.१३) = पदविच्छेदः - **यस्मात् प्रत्ययविधिः तदादि प्रत्यये अङ्गम्** | यस्मात् प्रकृति-रूपात् प्रत्ययः विहितः भवति, यस्य आदौ प्रकृतिः अस्ति, यस्य अनन्तरं स च प्रत्ययः उपस्थितः, तस्य नाम अङ्गम् | प्रकृतिः इत्युक्तौ धातुः प्रातिपदिकं च | "यस्य आदौ" उक्तं यतोहि मध्ये आगमाः आदेशाः च सन्ति चेदपि, आहत्य प्रत्ययात् प्राक् यावत् अस्ति, तत् सर्वम् "अङ्गम्" इत्युच्यते | विधानं विधिः | सूत्रं स्वयं सम्पूर्णम् - **यस्मात् प्रत्ययविधिः तदादि प्रत्यये अङ्गम्** | इदं **संज्ञासूत्रम्** |

१. यस्मात् प्रकृति-रूपात् प्रत्ययः विहितः भवति तस्य नाम अङ्गम् |

भू + शप्

२. यस्य आदौ प्रकृतिः अस्ति, यस्य अनन्तरं स च प्रत्ययः उपस्थितः तस्य नाम अङ्गम् |

भू + शप् + तिप्

गुणः - सूत्रसहिता दृष्टिः

गुणकार्यम् किम् ? कस्यचिद् वर्णस्य परिवर्तनम् |

इ , ई → ए

उ , ऊ → ओ

ऋ , ॠ → अ (अर्)

ऌ → अ (अल्)

इति भवति | इदं गुणकार्यम् |

केषां वर्णानां गुणः भवति ? इ , ई , उ , ऊ, ऋ , ॠ , ऌ इत्येतेषां वर्णानां गुणः भवति | कथं जानीमः ?

सूत्रम् -

इको गुणवृद्धी (१.१.३) = <u>पदविच्छेदः</u> - **इकः गुणः वृद्धिः** | सूत्रेषु यत्र यत्र गुणः वा वृद्धिः वा भवति इति उक्तः , अपि च कस्य (गुणः वा वृद्धिः वा) भवति इति न उक्तः ; तत्र तत्र सामान्यतया इक्-प्रत्याहारस्थस्य वर्णस्य एव (गुणः वा वृद्धिः वा) भवति इति अस्य सूत्रस्य आशयः | इकः षष्ठ्यन्तम् , अतः इक् वर्णः स्थानी भवति | गुणवृद्धी इति प्रथामा-द्विवचनम् , अतः आदेशौ | सूत्रं स्वयं सम्पूर्णम्— **इकः गुणः वृद्धिः** | इदं **परिभाषासूत्रम्** |

परिभाषासूत्रम् - अनियमे नियमकारिणी |

गुणः - सूत्रसहिता दृष्टिः

गुणवर्णाः के ? **अ (ह्रस्वः) , ए (दीर्घः) , ओ (दीर्घः)** इत्येते गुणवर्णाः | कथं जानीमः ?

सूत्रम् -

अदेङ्गुणः (१.१.२) = पदविच्छेदः - **अत् एङ् गुणः** | ह्रस्व-अकारः, दीर्घ-एकारः, दीर्घ-ओकारः (एङ्) एषां वर्णानां गुणसंज्ञा स्यात् | अत् एङ् च गुणसंज्ञः स्यात् इति | अत् च एङ् च अदेङ् | अदेङ् प्रथमान्तं, गुणः प्रथमान्तं, द्विपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **अत् एङ् गुणः** | इदं **संज्ञासूत्रम्** |

सामान्यः नियमः अस्ति - ' **अ** ' इति अष्टादशानाम् अकाराणां प्रतिनिधिः | ' **ए** ' इति द्वादशानाम् एकाराणां प्रतिनिधिः | ' **ओ** ' इति द्वादशानाम् ओकाराणां प्रतिनिधिः | अयं विषयः माहेश्वरसूत्राणां पठनसमये उक्तः |

अस्मिन् सूत्रे ' **अत्** ' इत्यनेन केवलं ह्रस्वः अकारः एव | दीर्घः अकारः न | प्लुतः अकारः अपि न |
अपि च ' **एङ्** ' इत्यनेन केवलं दीर्घः एकारः , दीर्घः ओकारः एव | प्लुतः एकारः , प्लुतः ओकारः न |

एतत् कथं जानीमः ? उत् उ - तपरः अत् अ - तपरः

' **अत्** ' इत्यस्मिन् त-कारः अ-कारात् परः वर्तते , अतः अ-कारः तपरः अस्ति इति उच्यते | **सूत्रेषु यस्माद् अपि स्वरात् परः त-कारः वर्तते , सः स्वरः स्वस्य कालस्य बोधकः भवति** |

सूत्रे ' **एङ्** ' इति पदम् अपि तपरः अस्ति | तत् कथम? तकारात् परः (**अत्** इत्यस्य तकारात् परः) एङ् अस्ति इति कारणतः | **सूत्रेषु तकारात् परः यः कोऽपि स्वरः वर्तते , सः स्वरः स्वस्य कालस्य बोधकः भवति** |

गुणः - सूत्रसहिता दृष्टिः

व्याकरणे अयं विषयः '**तपरकरणम्**' इति नाम्ना ज्ञायते |

सूत्रम् -

तपरस्तत्कालस्य (१.१.७०) = पदविच्छेदः - **तपरः तत् कालस्य** | यः कोऽपि स्वरः तपरः भवति , सः स्वरः स्वस्य कालस्य बोधकः स्यात् | तपरः इति समस्तपदम् | तस्य विग्रहवाक्यं द्विधा | प्रथमम् - तात् (तकारात्) परः यः वर्णः सः - पञ्चमीतत्पुरुषः | द्वितीयम् - तः (तकारः) यस्मात् परः सः - बहुव्रीहिः | तस्य कालः तत्कालः (तस्य कालः इव कालः यस्य सः तत्कालः) षष्ठीतत्पुरुषगर्भः बहुव्रीहिः | तस्य तत्कालस्य | तपरः प्रथमान्तम्, तत्कालस्य षष्ठ्यन्तम्, द्विपदमिदं सूत्रम् | **स्वं रूपं शब्दस्याशब्दसंज्ञा** (१.१.६८) इत्यस्मात् **स्वं रूपम्** इत्यनयोः अनुवृत्तिः | **अणुदित्सवर्णस्य चाप्रत्ययः** (१.१.६९) इत्यस्मात् **सवर्णस्य** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम् - **तपरः तत्कालस्य स्वस्य रूपस्य सवर्णस्य** | इदं **सवर्णग्राहकसूत्रम्** |

कस्य वर्णस्य स्थाने कः वर्णः आदिष्टः भवति ?

आहत्य इकः स्थाने अदेङ् आदिष्टः भवति |

पूर्वम् इदम् उक्तम् - **इ , ई → ए**

उ , ऊ → ओ

ऋ , ॠ → अ (अर्)

ऌ → अ (अल्)

गुणः - सूत्रसहिता दृष्टिः

इदं कथं जानीमः ?

स्थानेऽन्तरतमः (१.१.५०) = पदविच्छेदः - **स्थाने अन्तरतमः** | सूचयति यत् यस्य वर्णस्य स्थाने आदेशः भवति तस्य अन्तरतमः नाम तुल्यतमः (सदृशः) वर्णः आदिष्टः स्यात् | अस्मिन् प्रसङ्गे सारल्यार्थम् इदानीं तुल्यतमः इत्युक्ते उच्चारणस्थाने तुल्यतमः वर्णः इति अवगच्छेम | इदं **परिभाषासूत्रम्** |

आहत्य गुण-प्रसङ्गे

१. **इ, ई** - अनयोः उच्चारणस्थानं तालु , गुणवर्णेषु केवलम् **ए** इत्यस्य उच्चारणस्थानं कण्ठतालु ;
अतः इ , ई स्थाने ए आदिष्टः भवति |

२. **उ, ऊ** - अनयोः उच्चारणस्थानम् ओष्ठौ , गुणवर्णेषु केवलम् **ओ** इत्यस्य उच्चारणस्थानं कण्ठोष्ठम् ;
अतः उ, ऊ स्थाने ओ आदिष्टः भवति |

३. ऋ, ॠ - अनयोः उच्चारणस्थानं मूर्धा , गुणवर्णेषु कस्यापि उच्चारणस्थानं मूर्धा न |

४. ऌ इत्यस्य उच्चारणस्थानं दन्ताः , गुणवर्णेषु कस्यापि उच्चारणस्थानं मूर्धा न |

ऋ, ॠ, ऌ - एषां स्थाने यदि ह्रस्वः अकारः आदिष्टः भवति तर्हि सः अकारः रपरः भवति | रपरः इति समस्तपदम् | तस्य विग्रहवाक्यम् - रः परः यस्य सः रपरः |

गुणः - सूत्रसहिता दृष्टिः

सूत्रम् -

उरण् रपरः (१.१.५१) = ऋकारस्य स्थाने यदा अण्-आदेशः भवति, तदा सः अण् सदा रपरः स्यात् | ऋकारेण त्रिंशत्-प्रकारकः ऋकारः भवति इति बोध्यम् | रः परः यस्य सः रपरः | उः षष्ठ्यन्तम्, अण् प्रथमान्तं, रपरः प्रथमान्तं, त्रिपदमिदं सूत्रम् | **स्थानेऽन्तरतमः** (१.१.५०) इत्यस्मात् **स्थाने** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **उः स्थाने अण् रपरः** | इदं **परिभाषासूत्रम्** |

ऋऌवर्णयोर्मिथः सावर्ण्यं वाच्यम् (वा) = इदं वार्तिकम् | यद्यपि ऋ-कारः मूर्धन्यः, ऌ-कारः दन्त्यः तथापि द्वयोर्मध्ये परस्परं सावर्ण्यम् अस्ति इति इदं वार्तिकं वदति |

उरण् रपरः (१.१.५१) इत्यस्मिन् सूत्रे प्रयुक्तः
१. ‘ उः ' शब्दः ‘ ऋ ' , ‘ ऌ ' इत्यनयोः षष्ठी-एकवचनस्य रूपम् |
२. ‘ अण् ' प्रत्याहारे अ, इ, उ - एते वर्णाः स्युः |
३. ‘ रँ ‘ प्रत्याहारे ‘ र् ‘ , ‘ ल् ‘ एतौ वर्णौ स्याताम् |

लण्मध्ये त्वित्संज्ञकः - <u>पदविच्छेदः</u> - **लण् मध्ये तु इत् संज्ञकः** | माहेश्वरसूत्रेषु लण्-सूत्रस्थ-लकारात् परतः अकारः न कोवलम् उच्चारणार्थः अपि तु सः इत् संज्ञकः | तेन ‘ रँ ’ प्रत्याहारः (र्, ल्) क्रियते |

गुणः - सूत्रसहिता दृष्टिः

आहत्य गुण-प्रसङ्गे -

१. **इ, ई** - अनयोः उच्चारणस्थानं तालु , गुणवर्णेषु केवलम् **ए** इत्यस्य उच्चारणस्थानं कण्ठतालु ;
अतः इ , ई स्थाने ए आदिष्टः भवति |

२. **उ, ऊ** - अनयोः उच्चारणस्थानम् ओष्ठौ , गुणवर्णेषु केवलम् **ओ** इत्यस्य उच्चारणस्थानं कण्ठोष्ठम् ;
अतः उ, ऊ स्थाने ओ आदिष्टः भवति |

३. **ऋ, ॠ** - अनयोः स्थाने प्रथमं गुणवर्णेषु **अ** आदिष्टः भवति | तदनन्तरं सः **अ** रपरः भवति इत्युक्ते **अर्** भवति | **अर्** इतस्य उच्चारणस्थानं कण्ठमूर्धा | आहत्य ऋ, ॠ - अनयोः स्थाने **अर्** आदिष्टः भवति इति व्यवहारः वर्तते |

४. **ऌ** इत्यस्य स्थाने प्रथमं गुणवर्णेषु **अ** आदिष्टः भवति | तदनन्तरं सः **अ** रपरः भवति इत्युक्ते **अल्** भवति | **अल्** इतस्य उच्चारणस्थानं कण्ठदन्तः | आहत्य ऌ - इत्यस्य स्थाने **अल्** आदिष्टः भवति इति व्यवहारः वर्तते |

गुणः - सूत्रसहिता दृष्टिः

धातौ गुणः स्थलद्वये भवति -

१. धातोः अन्ते स्थितस्य इकः स्थाने गुणः भवति |

२. धातोः अन्तिमवर्णात् पूर्वं स्थितस्य ह्रस्व-इकः स्थाने गुणः भवति |

कैः सूत्रैः धातौ गुणः भवति ?

तदर्थं धातोः परः कीदृशः प्रत्ययः अस्ति इति चिन्तनीयम् | उदाहरणार्थं भ्वादिगणस्य चिन्तनं कूर्मः -

भू (भ्वादिः , सत्तायाम्) - लट्-लकार-प्रथमपुरुष-एकवचनस्य विवक्षायाम्

भू + **शप्** + **तिप्** → भू + अ + ति [**लशक्वतद्धिते** (१.३.८) , **हलन्त्यम्** (१.३.३) , **तस्य लोपः** (१.३.९)]

अत्र शप् प्रत्ययः शित् अस्ति यतः तस्मिन् श-कारः इत् संज्ञकः |

यः प्रत्ययः शित् वा तिङ् वा अस्ति , व्याकरणे तस्य अन्या संज्ञा अस्ति - **सार्वधातुकम्** |

सूत्रम् -

तिङ्शित् सार्वधातुकम् (३.४.११३) = धातोः विहितः तिङ्-शित् प्रत्ययः सार्वधातुकसंज्ञकः भवति | श् इत् यस्य सः शित्, बहुव्रीहिः | तिङ् च शित् च तयोः समाहारद्वन्द्वः तिङ्शित् | तिङ्शित् प्रथमान्तं, सार्वधातुकं प्रथमान्तं, द्विपदमिदं सूत्रम् | **प्रत्ययः** (३.१.१), **परश्च** (३.१.२), **धातोः** (३.१.९१) इत्येषाम् अधिकारः | अनुवृत्ति-सहितसूत्रम्— **धातोः परश्च तिङ्-शित् प्रत्ययः सार्वधातुकम्** | इदं **संज्ञासूत्रम्** |

गुणः - सूत्रसहिता दृष्टिः

सार्वधातुके प्रत्यये परे अङन्ते स्थितस्य इकः गुणः भवति |

भू + शप् + तिप् → भू + अ + ति [**लशक्वतद्धिते** (१.३.८) , **हलन्त्यम्** (१.३.३) , **तस्य लोपः** (१.३.९)]

→ भ् + ऊ + अ + ति

→ भ् + ओ + अ + ति [**तिङ्शित् सार्वधातुकम्** (३.४.११३) ,

सार्वधातुकार्धधातुकयोः (७.३.८४) - ऊ + अ → ओ + अ]

सूत्रम् -

सार्वधातुकार्धधातुकयोः (७.३.८४) = सार्वधातुकश्च आर्धधातुकश्च तयोरितरेतरद्वन्द्वः सार्वधातुकार्धधातुके, तयोः सार्वधातुकार्धधातुकयोः | सार्वधातुकार्धधातुकयोः सप्तम्यन्तम्, एकपदमिदं सूत्रम् | **मिदेर्गुणः** (७.३.८२) इत्यस्मात् **गुणः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | **इको गुणवृद्धी** (१.१.३) इत्यनेन परिभाषा-सूत्रेण, **इक्** स्थानी भवति यत्र स्थानी नोक्तम् | अनुवृत्ति-सहितसूत्रम्— **इकः अङ्गस्य गुणः सार्वधातुकार्धधातुकयोः** | इदं **विधिसूत्रम्** |

गुणः - सूत्रसहिता दृष्टिः

अत्र कश्चन प्रश्नः उदेति यत् -

१. **सार्वधातुकार्धधातुकयोः** (७.३.८४) इति वदति यत् **इकः अङ्गस्य गुणः सार्वधातुकार्धधातुकयोः** |

२. **भू** इति धतौ इक् वर्णः ऊकारः धातोः अन्तिमः वर्णः | शप् प्रत्ययः परः अस्ति इति कारणतः सः अङ्गम् अपि | अतः अङ्गान्ते इक् वर्णः अस्ति , अपि च तस्य गुणः जातः |

३. आहत्य , **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन ' **कथं वा अङन्ते स्थितस्य इकः गुणः भवति** ? ' इति प्रश्नः उदेति |

अस्य समाधानार्थम् सूत्रद्वयस्य साहाय्यम् अपेक्षितम् | तदर्थं किञ्चिद् इतोऽपि अवगन्तव्यम् -

१. विधिः इत्युक्ते कार्यम् | **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यस्य प्रसङ्गे कार्यम् अस्ति - गुणकार्यम् | अतः विधिः अस्ति गुणः |

२. **कस्य विधिः अस्ति** ? इक् वर्णस्य विधिः अस्ति |

३. **येन विधिः भवति** ? इक्-वर्णेन विधिः भवति |

सूत्रेषु येन वर्णेन विधिः उक्तः अस्ति सः विधिः द्वयोः स्थलयोः भवति - **ते के** ?

१. **स्वस्य** | **सार्वधातुकार्धधातुकयोः** (७.३.८४) इति सूत्रे यद् अङ्गं स्वयम् ' इक् ' अस्ति - तस्य |

२. **तदन्तस्य** | **सार्वधातुकार्धधातुकयोः** (७.३.८४) इति सूत्रे इगन्तस्य - इत्युक्ते तादृशम् अङ्गं यस्य अन्ते इक् अस्ति - इगन्तस्य अङ्गस्य |

आहत्य **यद् अङ्गम् इक्** अथवा **यद् अङ्गम् इगन्तम्** - द्वयोःअङ्गयोः गुणः भवति |

गुणः - सूत्रसहिता दृष्टिः

इदं कथं वा जानीमः ?

सूत्रम् -

येन विधिस्तदन्तस्य (१.१.७२) = विशेषणं तदन्तस्य अपि भवति, स्वस्यापि भवति | सोऽन्ते यस्य स तदन्तः, तस्य तदन्तस्य बहुव्रीहिः | विधीयते इति विधिः | येन तृतीयान्तं, विधिः प्रथमान्तं, तदन्तस्य षष्ठ्यन्तं, त्रिपदमिदं सूत्रम् | **स्वं रूपं शब्दस्याऽशब्दसंज्ञा** (१.१.६८) इत्यस्मात् **स्वम्, रूपम्** इत्यनयोः अनुवृत्तिः | विभक्तिपरिणामः इत्यनेन षष्ठ्यन्ते भवतः, **स्वस्य रूपस्य** | अनुवृत्ति-सहितसूत्रम्— **येन विधिः तदन्तस्य स्वस्य रूपस्य** (च) | इदं **परिभाषासूत्रम्** |

अत्र पुनः कश्चन प्रश्नः उदेति यत् -
१. यदि विधिः स्वस्य , तदन्तस्य च भवति तर्हि सः विधिः सम्पूर्णस्य अङ्गस्य स्थाने भवति वा ?
अस्य समाधानम् अस्ति , सम्पूर्णस्य अङ्गस्य स्थाने न भवति किन्तु अङ्गस्य अन्तिमवर्णस्य स्थाने एव भवति |

गुणः - सूत्रसहिता दृष्टिः

इदं कथं वा जानीमः ?

सूत्रम् -

अलोऽन्त्यस्य (१.१.५२) = षष्ठीविभक्ति-द्वारा यस्य पदस्य स्थाने आदेशः प्राप्तः, सः आदेशः अन्त्यस्य अल्-वर्णस्य स्थाने भवति | अलः षष्ठ्यन्तम्, अन्त्यस्य षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **षष्ठी स्थानेयोगा** (१.१.४९) इत्यस्मात् **षष्ठी**, **स्थाने** इत्यनयोः अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **षष्ठ्या अन्त्यस्य अलः स्थाने** (विद्यमानः आदेशः) | इदं **परिभाषासूत्रम्** |

आहत्य **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यस्य सूत्रस्य प्रयोगार्थं -
१. प्रत्ययः सार्वधातुकं भवेत् (आर्धधातूकानां प्रसङ्गः अग्रे भविष्यति) |
२. प्रत्ययः अङ्गात् परः भवेत् |
३. अङ्गम् स्वयम् इक् अथवा इगन्तं भवेत् |
तदानीम् इगन्ताङ्गस्य इकः गुणः भवति |

गुणः - सूत्रसहिता दृष्टिः

सार्वधातुकार्धधातुकयोः (७.३.८४) = इगन्ताङ्गस्य इकः गुणः भवति सार्वधातुके आर्धधातुके च प्रत्यये परे | सार्वधातुकञ्च आर्धधातुकञ्च तयोरितरेतरद्वन्द्वः सार्वधातुकार्धधातुके, तयोः सार्वधातुकार्धधातुकयोः | सार्वधातुकार्धधातुकयोः सप्तम्यन्तम्, एकपदमिदं सूत्रम् | **मिदेर्गुणः** (७.३.८२) इत्यस्मात् **गुणः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | **इको गुणवृद्धी** (१.१.३) इत्यनेन परिभाषा-सूत्रेण, **इक्** स्थानी भवति यत्र स्थानी नोक्तम् | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन '**इकः अङ्गस्य**' इत्युक्ते न केवलम् इक् इति अङ्गं, किन्तु तादृशम् अङ्गं यस्य अन्ते इक्; **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अङ्गस्य स्थाने गुणादेशः इति न, अपि तु अङ्गस्य अन्तिमवर्णस्य स्थाने गुणादेशः | अनुवृत्ति-सहितसूत्रम्— **इगन्ताङ्गस्य इकः गुणः सार्वधातुकार्धधातुकयोः** | इदं **विधिसूत्रम्** |

आहत्य ,

भू + शप् + तिप् → भू + अ + ति [**लशक्वतद्धिते** (१.३.८) , **हलन्त्यम्** (१.३.३) , **तस्य लोपः** (१.३.९)]

→ भ् + ऊ + अ + ति

→ भ् + ओ + अ + ति [**तिङ्शित् सार्वधातुकम्** (३.४.११३) ,
सार्वधातुकार्धधातुकयोः (७.३.८४) - ऊ + अ → ओ + अ]

तदनन्तरम् अत्र सन्धिकार्यं वर्णमेलनं च -

→ भ् + अव् + अ + ति [**एचोऽयवायावः** (६.१.७७) - ओ + अ → अव् + अ]

→ **भवति** [वर्णमेलनम्]

गुणः - सूत्रसहिता दृष्टिः

सन्धिसूत्रम् -

एचोऽयवायावः (६.१.७७) = पदविच्छेदः - **एचः अयवायावः** | एचः (ए, ओ, ऐ, औ इत्येषां) स्थाने क्रमेण अय्, अव्, आय्, आव् इत्यादेशाः भवन्ति अचि परे | क्रमेण इत्युक्तं **यथासंख्यमनुदेशः समानाम्** (१.३.१०) इति परिभाषा सूत्रस्य साहाय्येन | अय् च, अव् च, आय् च, आव् च, तेषाम् इतरेतरद्वन्द्वः, अयवायावः | एचः षष्ठ्यन्तम्, अयवायावः प्रथमान्तं, द्विपदमिदं सूत्रम् | **इको यणचि** (६.१.७६) इत्यस्मात् **अचि** इत्यस्य अनुवृत्तिः; **संहितायाम्** (६.१.७१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **एचः अयवायावः अचि संहितायाम्** |

अत्र सूत्रे केवलम् **एचः** स्थाने **अयवायावः** आदेशाः भवन्ति **अचि** परे **संहितायां** विषये इति उक्तम् | कथं वा जानीमः अत्र एतादृशः क्रमः वर्तते इति ?

ए → अय्
ओ → अव्
ऐ → आय्
औ → आव्

तदर्थम् इदं सूत्रम् -

यथासंख्यमनुदेशः समानाम् (१.३.१०) = सूत्रे स्थानिनः यस्मिन् क्रमे उक्ताः सन्ति आदेशाः अपि तस्मिन् क्रमे एव उक्ताः सन्ति इति सूत्रस्य अर्थः | इदं **परिभाषासूत्रम्** |

गुणः - सूत्रसहिता दृष्टिः

आहत्य, सम्पूर्णा प्रक्रिया इयम् -

भू + शप् + तिप्

→ भू + अ + ति [**लशक्वतद्धिते** (१.३.८) , **हलन्त्यम्** (१.३.३) , **तस्य लोपः** (१.३.९)]

→ भ् + **ऊ** + **अ** + ति

→ भ् + **ओ** + **अ** + ति [**तिङ्शित् सार्वधातुकम्** (३.४.११३) ,
सार्वधातुकार्धधातुकयोः (७.३.८४) - **ऊ** + **अ** → **ओ** + **अ**]

→ भ् + **अव्** + अ + ति [**एचोऽयवायावः** (६.१.७७) - **ओ** + **अ** → **अव्** + अ]

→ **भवति** [वर्णमेलनम्]